॥ पञ्चमं महावाक्यविवेकप्रकरणम् ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।

महावाक्यविवेकस्य कुर्वे व्याख्यां समासतः ॥१ ॥

मुमुक्षोः मोक्षसाधन-ब्रह्मात्मैकत्व-अवगतिसिद्धये प्रसिद्धानां चतुर्णां महावाक्यानां अर्थं क्रमेण निरूपयन् प्रमकृपालुराचार्य आदौ तावत् ऐतरेयारण्यकगते प्रज्ञानं ब्रह्म ऐत ५-२ आत्मबोधोप १ इति महावाक्ये प्रज्ञान शब्दस्य अर्थम् आह-

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।

स्वाद्वस्वाद् विजानाति तत्प्रज्ञानमुदीरितम् ॥ १ ॥

येन इदम् ईक्षते श्रृणोति जिघ्रति व्याकरोति च स्याद्वस्वाद् विजानाति । तत् प्रज्ञानम् उदीरितम् ॥१ ॥

येनेक्षत इति । येन चक्षुर्द्वारा निर्गत-अन्तःकरणवृत्ति-उपहित-चेतन्येन इदं दर्शनयोग्यं रूपादिकम् ईक्षते पश्यति पुरुषः तथा श्रोत्रद्वारा निर्गत-अन्तःकरणवृत्ति-उपाधिकेन येन शब्दजातं श्रृणोति तथैव घ्राणद्वारा निर्गत-अन्तः करणवृत्त्युपाधिकेन येन गन्धजातं जिघ्रति येन वागिन्द्रिय-अवच्छिन्नेन व्याकरोति शब्दजातं व्याहरति येन रसेन्द्रियद्वारा-निर्गतान्तःकरणवृत्त्युपाधिकेन स्वाद्वस्वाद् रसौ विजानाति अनुक्तम् उच्चयार्थः च शब्दः तथा च अनुक्तैः सकलेन्द्रियैः अन्तःकरणवृत्तिभेदः च उपलक्षितं यत् चैतन्यम् अस्ति तदेव अत्र प्रज्ञानम् इति उच्यते इत्यर्थः । अनेन येन वा पश्यति ऐ ५-१ इत्यादेः सर्वाण्येवेतानि प्रज्ञानस्य नामधेयानि ऐ ५-२ इत्यन्तस्य आवान्तरवाक्य-संदर्भस्यार्थः संक्षिप्य दर्शितः ॥१ ॥

एवं प्रज्ञानशब्दस्य अर्थम् अभिधाय ब्रह्म शब्दस्य अर्थमाह-

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ।

चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्ममय्यपि ॥ २ ॥

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु एकं चैतन्यं ब्रह्म । अतः मयि अपि प्रज्ञानं ब्रह्म ॥२ ॥

चतुर्मुखेति । उत्तमेषु देवादिषु मध्यमेषु मनुष्येषु अधमेषु अश्वगवादिषु देहधारिषु आकाशादिभूतेषु च

जगज्जन्मादि-हेतुभूतं यदेकं चैतन्यम् अस्ति तद् ब्रह्म इत्यर्थः। अनेन च एष ब्रह्मैष इन्द्रः ऐ ५-३ इत्यादेः प्रज्ञा प्रतिष्ठा ऐ ५-३ आत्मबो १ इत्यन्तस्य अवान्तरवाक्यस्य अर्थः संक्षिप्य दर्शितः। इत्थं पदार्थम् अभिधाय वाक्यार्थम् आह-अत इति। यतः सर्वत्र-अवस्थितं प्रज्ञानं ब्रह्म अतः मयि अपि स्थितं प्रज्ञानं ब्रह्मैव प्रज्ञानत्व-अविशेषात् इत्यर्थः ॥२॥

एवं ऋक्शास्त्रागतं महवाक्यार्थं निरूप्य यजुः शाखासु मध्ये बृहदारण्यकोपनिषद्गतस्य अहं ब्रह्मास्मि बृ १-४-१० इति महावक्यस्य अर्थाविष्करणाय अहं शब्दस्य अर्थम् आह-

परिपूर्णः परात्माऽस्मिन् देहे विद्याधिकारिणि।

बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते ॥ ३ ॥

परिपूर्णः परात्मा अस्मिन् विद्याधिकारिणि देहे बुद्धेः साक्षितया स्थित्वा स्फुरन् अहम् इति ईर्यते ॥३॥

परिपूर्ण इति। परिपूर्णः स्वभावतः देशकालवस्तुभिः अपरिच्छिन्नः परमात्मा अस्मिन् मायाकल्पिते जगति विद्याधिकारिणि शमादिसाधनसंपन्नत्वेन विद्यासंपादन-योग्ये अस्मिन् श्रवणादि-अनुष्ठानवति देहे मनुष्यादिशरीरे बुद्धेः बुद्ध्युपलक्षितस्य सूक्ष्मशरीरस्य साक्षितया अविकारित्वेन अवभासकतया स्थित्वा अवस्थाय स्फुरन् प्रकाशमानः अहम् इति ईर्यते लक्षणया अहं पदेन उच्यते इत्यर्थः ॥३॥

ब्रह्म शब्दार्थम् आह-

स्वतःपूर्णः परात्माऽत्र ब्रह्मशब्देन वर्णितः।

अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम्॥ ४ ॥

स्वतः पूर्णः परात्मा अत्र ब्रह्मशब्देन वर्णितः। अस्मि इति ऐक्यपरामर्शः। तेन अहं ब्रह्म भवामि ॥४ ॥

स्वत इति। स्वतः परिपूर्णः स्वभावतः देशकालादि-अनवच्छिन्नः पूर्वोक्तः परमात्मा अत्र अस्मिन् महावाक्ये ब्रह्म शब्देन ब्रह्म इति अनेन पदेन वर्णितः लक्षणया उक्तः इत्यर्थः। अतद् वाक्यगतेन अस्मि इति पदेन पदद्वय-सामानाधिकरण्यलभ्यं जीवब्रह्मणोः ऐक्यं परामृश्यत इति आह-अस्मीति। फलितमाह-तेनेति ॥४ ॥

इदानीं छान्दोग्यश्रुतिगतस्य तत्त्वमसि छा ६-८-७ इति वाक्यस्य अर्थप्रकाशनाय तत् पदलक्ष्यार्थम् आह-

एकमेवाद्वितीयं सन्नामरूपविवर्जितम्।

सृष्टेः पुराऽधुनाप्यस्य तदितीर्यते॥ ५॥

सृष्टेः पुरा एकम् एव अद्वितीयं नामरूपविवर्जितं सत्। अस्य अधुना अपि तादृत्त्वं सत् इति ईर्यते॥५॥

एकमेवेति। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् छा ६-२-१ इति वाक्येन सृष्टेः पुरा स्वगतादिभेदशून्यं नामरूपरहितं यत्सद्वस्तु प्रतिपादितमस्ति अस्य सद्वस्तुनः अधुना अपि सृष्टि-उत्तरकाले अपि तादृत्त्वं विचारदृष्ट्या तथात्वं तदितिपदेन ईर्यते लक्ष्यते इत्यर्थः॥५॥

त्वं पदलक्ष्यार्थम् आह-

श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम्।

एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम्॥ ६॥

श्रोतुः देहेन्द्रियातीतं वस्तु अत्र त्वम्पदेरितम्। असि इति एकता ग्राह्यते। तदैक्यम् अनुभूयताम्॥६॥

श्रोतुः इति। श्रोतुः श्रवणादि-अनुष्ठानेन महावाक्यार्थ-प्रतिपत्तुः देहेन्द्रियातीतं देहेन्द्रिय-उपलक्षित-स्थूलादि-शरीरत्रय-साक्षितया तद्विलक्षणं वस्तु सद्वस्तु एव त्वं पदेरितं वाक्यगतेन त्वमिति पदेन लक्षितम् इत्यर्थः। एतद् वाक्यस्थेन असि इति पदेन तत्त्वं पदसामान्याधिकरण्यलब्धं पदार्थद्वयैक्यम् शिष्यं प्रति प्रत्याय्यत इत्याह- एकतेति। सिद्धम् अर्थम् आह- तदैकयमिति। तयोः तत्त्वं-पदार्थयोः ऐक्यं प्रमाणसिद्धम् एकत्वम् अनुभूयतां मुमुक्षुभिः इत्यर्थः॥६॥

क्रमप्राप्तस्य अथर्ववेदगतस्य अयमात्मा ब्रह्म माण्डू २ इति वाक्यस्य अर्थं व्याचिकीर्षुः आदौ अयमात्मा इति पदद्वयेन विवक्षितम् अर्थं क्रमेण दर्शयति-

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम्।

अहङ्कारादिदेहान्तात्प्रत्यगात्मेति गीयते॥ ७॥

अयम् इति उक्तितः स्वप्रकाश-अपरोक्षत्वं मतम्। अहंकारादि-देहान्तात् प्रत्यक् आत्मा इति गीयते ॥७॥

स्वप्रकाशेति। अयमिति उक्तितः अयम् इति शब्देन स्वप्रकाश-अपरोक्षत्वं स्वप्रकाशेन अपरोक्षत्वम् मतं अभिमतम्। अदृष्टादिवत् नित्यपरोक्षत्वं घटादिवत् दृश्यत्वं च व्यावर्तयितुं विशेषणद्वयम् इति बोद्धव्यम्।देहादिषु अपि आत्मशब्द-प्रयोगदर्शनात् अत्र आत्मशब्देन किम् विवक्षितम् इति आकाङ्क्षायाम् आह- अहंकारेति। अहंकारः आदिः यस्य प्राणमन-इन्द्रिय-देहसंघातस्य सः अहंकारादिः तथा देहे अन्तः यस्य उक्त-संघातस्य सह् देहान्तः अहंकारादिः च असौ देहान्तः च इति तथा तस्मात् प्रत्यग्-अधिष्ठानतया साक्षितया चान्तरः आत्मा इति गीयते अस्मिन् वाक्य इत्यर्थः ॥७॥

ब्राह्मणादिषु अपि ब्रह्म शब्दस्य प्रयोगदर्शनात् तद्-व्यावर्तनाय अत्र विवक्षितम् अर्थम् आह-

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते।

ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम्॥ ८॥

दृश्यमानस्य सर्वस्य जगतः तत्त्वं ब्रह्मशब्देन ईर्यते। तत् ब्रह्म स्वप्रकाशात्मरूपकम् ॥८॥

दृश्यमानस्य इति। दृश्यत्वेन मिथ्याभूतस्य सर्वस्य कारणादेः जगतः तत्त्वम् अधिष्ठानतया तद्-बाध-अवधित्वेन च पारमार्थिकं सच्चिदानन्दलक्षणं यद्रूपम् अस्ति तद् ब्रह्मशब्देन ईर्यते कथ्यते इत्यर्थः। वाक्यार्थमाह- तद्ब्रह्मेति। यदुक्तलक्षणं ब्रह्म स्वप्रकाशात्मरूपं स्वरूपं यस्य तत्-स्वप्रकाशात्मरूपम् सः एव इत्यर्थः ॥८॥